# Kailasachaturdvarasthalingabhidhanam 3

# કૈલાસચતુર્દ્વારસ્થલિઙ્ગાભિધાનમ્ ૩

## Document Information

Text title : Kailasachaturdvarasthalingabhidhanam 3

File name : kailAsachaturdvArasthalingAbhidhAnam3.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mAheshvarAkhyaH prathamAMshaH | adhyAyaH 42 - kailAsapashchimadvAraliNgAbhidhAnam | 2-42||

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 20, 2023

*sanskritdocuments.org*

# કૈલાસચતુર્દ્વારસ્થલિઙ્ગાભિધાનમ્ 3

(કૈલાસપશ્ચિમદ્વારસ્થલિઙ્ગાભિધાનસ્તોત્રમ્ ૩)

ઈશ્વરઃ -

પાશ્ચાત્યાપારશૃઙ્ગેષુ શૃણુ લિઙ્ગકુલં શિવે ।
પ્રસિદ્ધાન્યપિ લિઙ્ગાનિ મમેષ્ટાનિ શૃણુ પ્રિયે ॥ ૨॥

- -

તત્પૂરુષેશસ્સ્થાણ્વીશઃ પૈઙ્ગેશો રુડજેશ્વરઃ ।
સાલ્વેશ્વરસ્સ્થાનકેશો વૈનતેશસ્સલેશ્વરઃ ॥ ૩॥

મુસલેશો હાટકેશો રુદ્રધન્વીશ્વરસ્તથા ।
જ્વરાપહારકેશશ્ચ તથાક્ષયહરેશ્વરઃ ॥ ૪॥

પ્રાણેશશ્ચ વિદર્ભેશો દેવેશસ્ત્વચલેશ્વરઃ ।
અનઙ્ગેશશ્શમ્બરેશ ઉગ્રેશો ધાન્યકેશ્વરઃ ॥ ૫॥

બલાશશીશ્વરશ્ચૈવ ઘનઘોષેશ્વરસ્તથા ।
વેદગર્ભેશ્વરશ્ચૈવ ઓઙ્કારેશશ્શિખીશ્વરઃ ॥ ૬॥

ગદાધરેશ્વરશ્ચૈવ બિલ્વમૂલેશ્વરસ્તથા ।
સૂત્રેશ્વરો ભારતીશસ્તુઙ્ગભદ્રેશ્વરસ્તથા ॥ ૭॥

સનાતનેશો વૈદ્યેશઃ કુલિઙ્ગેશઃ પ્રજેશ્વરઃ ।
માણ્ડવ્યેશસ્તામ્બકેશો બોધેશો વિઘસેશ્વરઃ ॥ ૮॥

પ્રઘસેશોઽથ ઋભ્વીશો ગણગીતેશ્વરસ્તથા ।
શુક્લેશ્વરઃ પ્રસિદ્ધેશસ્સિદ્ધેશશ્ચ શનીશ્વરઃ ॥ ૯॥

પક્ષીશઃ પત્રિકેશશ્ચ કુલીશોઽથવનીશ્વરઃ ।
પર્વેશ્વરઃ પર્વતેશસ્સર્વેશઃ કાન્તિકેશ્વરઃ ॥ ૧૦॥

બર્હિધ્વજેશ્વરશ્ચૈવ કપોતેશઃ ખણીશ્વરઃ ।

શતેશ્વરો રોમકેશઃ કાવ્યેશો વર્ષકેશ્વરઃ ॥ ૧૧॥

સોમનન્દીશ્વરશ્ચૈવ ત્રિફુલીશઃ ખરેશ્વરઃ ।
હનેહતીશ્વરશ્ચૈવ શતર્ચેશો ભવેશ્વરઃ ॥ ૧૨॥ (હનહેતી)
વિડૂરથેશ્વરશ્ચૈવ કરમ્ભીશસ્સુવેશ્વરઃ ।
ગણેશ્વરો વર્ધિકેશસ્સદ્ધ્રીશઃ ક્લિકકેશ્વરઃ ॥ ૧૩॥

ચિત્રવ્યાધેશ્વરશ્ચૈવ રૌપ્યેશો બન્ધકેશ્વરઃ ।
તથા પશુપતીશશ્ચ ભયહારીશ્વરસ્તથા ॥ ૧૪॥

જન્મહારીશ્વરશ્ચૈવ દુઃખહારીશ્વરસ્તથા ।
બ્રહ્મયોનીશ્વરશ્ચૈવ વિષ્ણુગર્ભેશ્વરસ્તથા ॥ ૧૫॥

રુદ્રલોમેશ્વરશ્ચૈવ ચેન્દ્રધામેશ્વરસ્તથા ।
ચન્દ્રચૂડેશ્વરશ્ચૈવ અગ્નિગર્ભેશ્વરસ્તથા ॥ ૧૬॥

વાયવીશો જલેશશ્ચ મેઘેશો વૈદ્યુદેશ્વરઃ ।
અમોદેશસ્તિત્તિરીશો દ્યાવાભૂમીશ્વરસ્તથા ॥ ૧૭॥

ગજાજિનધરેશશ્ચ નરસિહ્મેશ્વરસ્તથા ।
ઔપાસનેશ્વરશ્ચૈવ હવ્યેશો ગણકેશ્વરઃ ॥ ૧૮॥

કર્ણિકેશોદધીચેશો ઝલ્લેશઃ કર્કટીશ્વરઃ ।
જાબાલેશસ્સુબાલેશઃ પુરહારેશ્વરસ્તથા ॥ ૧૯॥

ઋગ્વેદેશોઽથર્વકેશઃ પુરાણેશોર્વશીશ્વરૌ ।
ઇતિહાસેશ્વરશ્ચૈવ ધર્મસારેશ્વરસ્તથા ॥ ૨૦॥

સાઙ્ખ્યેશ્વરશ્ચયોગેશોમૌલીશઃ પાલિકેશ્વરઃ ।
કુજમ્ભેશશ્ચ જમ્ભેશોરાજરાજેશ્વરસ્તથા ॥ ૨૧॥

કૌથુમીશોવિશાખેશસ્સ્કન્નેશઃ ફલિકેશ્વરઃ ।
કદલીશઃ પૃષ્ટકીશઃ પૃથ્વીશઃ કાર્મુકેશ્વરઃ ॥ ૨૨॥

અન્તરિક્ષેશ્વરશ્ચૈવ મૈત્રેશઃ કુમુદેશ્વરઃ ।
ઉદાવસેશ્વરશ્ચૈવ મલ્લેશો બ્રહ્મકેશ્વરઃ ॥ ૨૩॥

તરઙ્ગેશઃ કુરઙ્ગેશો મકરન્દેશ્વરસ્તથા ।
સુધાધરેશ્વરશ્ચૈવ ધૃતકેશેશ્વરસ્તથા ॥ ૨૪॥

વ્યાલેશ્વરો વિતર્કેશઃ કાનનેશો મુનીશ્વરઃ (તિમીશ્વરઃ) ।

ભદ્રમાલેશ્વરશ્ચૈવ કેતુમાલેશ્વરસ્તથા ॥ ૨૫॥

મન્દરેશો વિન્ધ્યકેશો હિમેશો નીલકેશ્વરઃ ।
મહેન્દ્રેશઃ કર્મકેશો ઋત્વીશો ધૂનનેશ્વરઃ ॥ ૨૬॥

વીતહવ્યેશ્વરશ્ચૈવાપ્યશ્વત્થામેશ્વરસ્તથા ।
શિશિરેશસ્તીર્થકેશો હિમેશો નીલકેશ્વરઃ ॥ ૨૭॥

મહેન્દ્રેશઃ કર્મકેશસ્ત્રિનવેશોઽબ્જકેશ્વરઃ ।
અપસ્મારહરેશશ્ચ સોમચણ્ડીશ્વરસ્તથા ॥ ૨૮॥

તથા માર્ગસહાયશો દેવીશોઽરુણજેશ્વરઃ ।
જ્વલનેશઃ પાવકેશસ્તથૈવાઙ્ગિરસેશ્વરઃ ॥ ૨૯॥

દક્ષેશ્વરો વિદક્ષેશો મૈનાકેશસ્સતીશ્વરઃ ।
પ્રમથેશઃ પ્રમાથીશો ભોજેશો વિક્રમેશ્વરઃ ॥ ૩૦॥

ઈડ્યેશ્વરશ્ચ યાજ્યેશઃ કર્ણવેધેશ્વરસ્તથા ।
તર્ણકેશઃ પાણ્ડરેશો મેઘવાહેશ્વરસ્તથા ॥ ૩૧॥

કનિષ્ઠેશ્ચ જ્યેષ્ઠેશસ્તામ્રેશશ્શૌનકેશ્વરઃ ।
અનાહતેશ્વરશ્ચૈવ પીતેશો ધૂમ્રકેશ્વરઃ ॥ ૩૨॥

બન્ધમોચનકેશશ્ચ તથા દેવિ શતેશ્વરઃ ।
ભ્રમરેશઃ કાણ્ઠકેશો દ્રુમચણ્ડીશ્વસ્તથા ॥ ૩૩॥

વિશાલાક્ષેશ્વરશ્ચૈવ વસન્તેશઃ ખગેશ્વરઃ ।
ગજાસુરહરેશશ્ચ નીલકણ્ઠેશ્વરસ્તથા ॥ ૩૪॥

સુમિત્રાવરુણેશશ્ચ કલહંસેશ્વરસ્તથા ।
સાવિત્રીશો ગોમતીશો ગોનર્દેશો વૃષેશ્વરઃ ॥ ૩૫॥

ગતિપ્રદેશ્વરશ્ચૈવ વ્યાસેશો ગોલકેશ્વરઃ ।
મહાભૂતેશ્વરશ્ચૈવ રસેશો ગન્ધકેશ્વરઃ ॥ ૩૬॥

બાડબેશો ભટેશશ્ચ સર્વપ્રાણાતિગેશ્વરઃ ।
તટાતકેશ્વરશ્ચૈવ ગર્ભકોશેશ્વરસ્તથા ॥ ૩૭॥

તોરણેશો રથીશશ્ચાપ્યાતપેશશ્શશીશ્વરઃ ।
દુન્દુભીશસ્સિન્ધુરેશો જવનેશઃ કૃપેશ્વરઃ (કૃષીશ્વરઃ) ॥ ૩૮॥

વીરભદ્રેશ્વરશ્ચૈવ કર્ણદારેશ્વરસ્તથા ।
તામ્રધ્વજેશ્વરશ્ચૈવ કોવિદારેશ્વરસ્તથા ॥ ૩૯॥

શતદ્રુતીશ્વરશ્ચૈવ મહારોગહરેશ્વરઃ ।
કામદાનેશ્વરશ્ચૈવ બિલ્વાદેશો નિમીશ્વરઃ ॥ ૪૦॥

રુદ્રેશો નાગકેશશ્ચ તારણેશોઽમ્બિકેશ્વરઃ ॥ ૪૧॥

- -

શરચ્છશિગલત્સુધારસસમાનલિઙ્ગાવલિઃ
હરિન્મણિનિભછવિપ્રથિતબિલ્વમૌલીન્દુકમ્ ।
ફણીન્દ્રફણિમણ્ડલાકલિતભાલપુણ્ડ્રાઙ્કિતં
મણીન્દ્રવરધામગમં વસિતગન્ધબન્ધામ્બરમ્ ॥ ૪૨॥

પશ્ચાદ્ભાગનગે મમૈવ વિહિતાં લિઙ્ગાવલીન્દુ પ્રભામ્ ॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે માહેશ્વરાખ્યે કૈલાસચતુર્દ્વારસ્થલિઙ્ગાભિધાનમ્ -
૩ - કૈલાસપશ્ચિમદ્વારસ્થલિઙ્ગાભિધાનસ્તોત્રમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । માહેશ્વરાખ્યઃ પ્રથમાંશઃ । અધ્યાયઃ ૪૨ - કૈલાસપશ્ચિમદ્વારલિઙ્ગાભિધાનમ્ । ૨-૪૨॥

- .. shrIshivarahasyam . mAheshvarAkhyaH prathamAMshaH . adhyAyaH 42 - kailAsapashchimadvAralingAbhidhAnam . 2-42..

Notes:

Īśvara ઈશ્વર lists the names of the several Śivaliṅga-s શિવલિઙ્ગ around Kailāsa કૈલાસ in the Four Cardinal direction - among which are the Śivaliṅga-s શિવલિઙ્ગ at the Western Gate. He mentions to Devī દેવી; at the conclusion of the list of the Northen Gate, the merits of worshipping and reciting the names of all of the four groups of Śivaliṅga-s શિવલિઙ્ગ.

Encoded and proofread by Ruma Dewan

*Kailasachaturdvarasthalingabhidhanam 3*

pdf was typeset on December 20, 2023

Please send corrections to *sanskrit@cheerful.com*